	उतानाम्? अन्तरा द्यावापृथिवी उभे ॥११॥	
	ब्रह्मैवाभवद् उत्तरं जातवेदो अदद् वज्रो यातुधानं महाबलम् ।	
	भवाशर्वौ तपुर्षी हेतिम् अस्मै नयशितौ? वि सृजतां वधाय ॥१२॥ ॥का° ४॥	भव° उपुषियं... ॥ अप्नूपब्रह्मसूक्तम् ॥१॥
	८.१०	
	यद् अश्विना ओषधीष्व् आसिक्तां पुष्करस्रजा वीरुधो मधु बिभ्रतीनः? ।	* * * °सिक्तं...
पै ४.१०.७[४.५]	तेनाहम् अस्या मूर्धानम् अभि षिञ्चामि नार्याः ॥१॥	तिनाहमस्य * * * नायः
	[यद्] अश्विना पुष्पाद् अधि माक्षिकं मधु संभृतम् अन्ने लवणेन मधुमतेन ।	
	[तेनाहम् अस्या मूर्धानम् अभि षिञ्चामि नार्याः] ॥२॥	
	[यद्] अश्विना गुग्गुलम् आञ्जने मधु संभृतं यद् अस्मिन् मदुघे मधु ।	* * गुग्गूलुं... मधुगो *
	[तेनाहम् अस्या मूर्धानम् अभि षिञ्चामि नार्याः] ॥३॥	
	यद् अश्विना क्ष? मधु गोष्व् अश्वेषु यन् मधु ।	
शौ ६.६९.१[३.४]	सुरायां सिच्यमानायां कीलाले ऽधि यन् मधु ।	
	तेना[हम् अस्या मूर्धानम् अभि षिञ्चामि नार्याः] ॥४॥	तेन
	यद् अश्विना गोवर्चसं हिरण्यवर्चसं हस्तिवर्चसम् अश्विना ।	
	तेनाहम् अस्या मूर्धानम् अभि षिञ्चामि नार्याः ॥५॥	
	अभि नन्दम् अभि मोदम् अभि तल्पं कृणोमि ते ।	* * * मोजम्...
	आ ते भगं वर्तयेताम् अश्विना पुष्करस्रजा ॥६॥	या * * वत्तयेताम् * °स्सृजा

	यद् अप्सु ते वर्चस् सुभगे जिह्वायां ते मधूलक[म्] ।	
	अक्ष्यौ नकरणी? तव प्रतीकं मधुमत्तरम् ।	अक्षौ * तवत्पुतीकं *
	¿आशितस्य तलाशेव वृक्षैवापतिक्र× पति? ॥७॥	
	त्वं सम् अग्रभी× पुंसश् श्येन इवान्यान् पतत्रिणः ।	* * °भीत्...
	आयि? ते ऽहार्षम् उदकम् अपो भगादिषेचनम्? ॥८॥	
	यत् ते वर्चो ऽपक्रान्तं ¿मनस्य प्रतिचक्षणः? ।	
पै ४.२.७[१.२]	पुनस् तद् अश्विना त्वय्य् आ धत्तां पुष्करस्रजा ॥९॥	...दत्तां °जाः
	अभि त्वा वर्चसासृजन् दिव्येन पयसा सह ।	* * °सृजं...
	यथा पतिर्विस्यसो? देवृभ्यो मधुमत्तरा ॥१०॥	* * देव ऋग्भ्यो मनुमत्तरा
पै ५.११.६	भगं ते मित्रावरुणा भगं देवी सरस्वती ।	...दिवी *
	भगं ते अश्विनोभा धत्तां पुष्करस्रजा ॥११॥	* * * दत्तां आदत्तां पुष्करस्रज (प्रान्ते भगं ते मित्रावरुणौ भगं दिवी सरस्वती भगं ते अश्विनौ देवौ आ दत्तां पुष्करास्रजम् । पाठः)
	पतिं ते राजा वरुण× पतिं देवो बृहस्पतिः ।	पतिपति ते...
	पतिं त इन्द्रश् चाग्निश् च पतिं धाता दधातु ते ॥१२॥ ॥का°५॥ ॥अनु°२॥	...दाता ददातु *

८.११

	चतस्रस् ते खल स्रक्तीर् अथो मध्यम् अहं खल ।	
	धाराश् चतस्रस् तोष्यामि वेदिं मानुष्यवर्धनीम् ॥१॥	...°र्धिनीं
	ऊर्जस्वन्तम् आ रभध्वं स्फातिवन्तं पुनीत नः ।	ऊर्जस्वतम्...पुनीदि *
	इन्द्रो बीजस्याभ्यावोढा भग एतु पुरोगवः ॥२॥	...भगैतु पुरोगव
	भगस्य हानड्वाहौ युञ्जाते राशिवाहनौ ।	* हन° यंजात राशिर्वा°
	अध× पृथिव्या× कीलालम् इहा वहताम् अश्विना ॥३॥	अधा× ...वहत्तम् *
	अभिहित× परिहितो धानेन विभु× प्रभुः ।	
	धर्ता मनुष्याणां जज्ञे देवानाम् आज्यं खलः ॥४॥	...खल
	¿स्रुचा संपनी सृणीका परिष्कृत ।	
	¿कीनाशा सं नो तारो बीजदासाद् धविष्मतिः ॥५॥	
	¿इहेन्द्र मुष्टिर्ध्य सृजस्वपूर्णा विह सौमनसस् समृद्धयताम्? ।	
	होतारो ये च गन्धर्वास् ते हि स्फातिं सम् आवहन् ॥६॥	...मम् आवहः
	अतिपश्योनृचायकयड्डक×? पक्वम् आ भर ।	
	ईशाना गन्धर्वा भुवनस्य सं वहन्तु खले स्फातिम् इहासौनृतां? च ॥७॥	* * * स...
	आ पश्चाद् आ पुरस्ताद् उत्तराद् अधराद् उत ।	
	इन्द्राय वसोर् ईशानः खले स्फातिं सम् आवहन् ॥८॥	...आहां
	स्फातिम् इन्द्र× खले बह्वीम् ¿इहोत्प्राणम् उत् पृणत्? ।	
	स्फातिं मे विश्वे देवास् स्फातिं सोमो अथो भगः ॥९॥	स्फाति...
	स्फातिर् मे अस्तु हस्तयोस् स्फातिर् यत्र मा रारभे ।	
	शतहस्तेन मोत् पृण समुद्रस्येव मध्यतः ॥१०॥	* मुत्...
	इह मे भूय आ भर यथाहं कामये तथा ।	* * भूया * * * *
	यथेयम् अद्य स्फायते यत्रैव हस्तिनस् सह ॥११॥ ॥का°१॥	* उद्य स्फायातैत्रैव * *

८.१२

	स्वद्वियं? ता अश्विना सुरे कृणुतां पुष्करस्रजा ।	
	याम् असिञ्चन् सौधन्वना विश्वे देवा मरुद्गणाः ।	* असिञ्चं सौधन्विना...
	याम् अश्विनासिञ्चतां सा सुरा बहु धावतु ॥१॥	* * मामुना * *
	स्वादोस् स्वादीयसी भव मधोर् मधुतरा भव ।	
	अथ ऋष्येस्ययवमाष्यैवाक्त्यं? सुभगे भव ॥२॥	
	अभ्रा[ज्] जातं वर्षा[ज्] जातम् अथो जातं दिवस् परि ।	...विदम् *
	अथो समुद्राज् जातं तत् सुराधरणं भव ॥३॥	...सुरादगणं *
	नाडीनाम् असि जनुषा सा सुराधरणी भव ।	* आसि...
	शाखा हि भद्रस्थासि ¿वृक्ष स्वादु विकंगतं? ॥४॥	सखा * °सी...

	असुरस् त ऊर्ध्वनभसश् चकार प्रथमस् स्वरे ।	
	¿सुरे दासश् चित्वा गृहे सिरश्चान्धस्य चक्कतु? ॥५॥	
	¿निष् पुष्पकं कशीकाया? निर् धारय सुराम् उत ।	…धाराया * *
	उद् एहि वाजिनीवति किम् अङ्कतिष्व् इच्छति ॥६॥	* ईहि * * °तीष्व् *
	किम् एतं जन्या आसते ऽगस्तीर् अभिधृष्णवः ।	* * जन्यासते * आभिधृष्णव
	सुरे देवि परि प्रेहि मादयन्ती जनंजनम् ॥७॥	
	अस्या गृह्णामि स्थालेन गाम् अश्वं धान्यं वसु ।	* गृह्ण…
	सा सुरा बहु धावतु ॥८॥	
	आचरन्तीर् पर्वतेभ्यर् खनमाना अनभ्रयः ।	…°य
	यासां समुद्रे संस्थानं यासां नास्ति निवेशनम् ।	
	तास् ते ददतु बुद्बुदम् इदं कुरु चेमां सुराम् ॥९॥	* * * बुद्बुदं…
	यां हृदा कामयामहे तावन्म? भगस् ताम् अश्विना तावन्मावङ्? सरस्वती ।	
	अयं देवो मयूलषश्? श्वशुराद् अरणं ददत् ॥१०॥	
	संस्रवणार् परिस्रवणा गिरिभ्यस् पर्य् आभृताः ।	°णात्… °भृतः
	मध्ये शतस्य मप्सिष्को? [अ]नड्वान् इमा मेहतु ॥११॥ ॥का° २॥	…इम *
ऋ ४.५८.१–११ का ४०.७	**८.१३**	
	समुद्राद् ऊर्मिर् मधुमाँ उद् आरद् उपांशुना सम् अमृतत्वम् आनट् ।	* उर्मि मधुमां…आनत्
	घृतस्य नाम गुह्यं यद् अस्ति जिह्वा देवानाम् अमृतस्य नाभिः ॥१॥	
	वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।	इयं नामा…नवो(उपरि मो)भिः
	उप ब्रह्मा शृणवच् छस्यमानं चतुश्शृङ्गो ऽवमीद् गौर एतत् ॥२॥	* ब्रह्माश्छृणवश्…गोर *
	चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।	* शृङ्गस् * * * द्वि…
	त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥३॥	
	त्रिधा हितं पणिभिर् गुह्यमानं गवि देवासो घृतम् अन्व् अविन्दन् ।	* हिकं…
	इन्द्र एकं सूर्य एकं जजान वेनाद् एकं स्वधया निष् टतक्षुः ॥४॥	…क्रतक्षुः
	एता अर्षन्ति हृद्यात् समुद्राच् छतव्रजा रिपुणा नावचक्षे ।	…निपुणा *
	घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्ये आसाम् ॥५॥	…रितसो * *
	सम्यक् स्रवन्ति सरितो न धेना अन्तर् हृदा मनसा सूयमानाः ।	* * * * देवा…
	एते अर्षन्त्य् ऊर्मयो घृतस्य मृगा इव क्षिपणोर् ईषमाणाः ॥६॥	…। अे मृग इव क्षिपणोरीषमाणास्
	सिन्धोर् इव प्राध्वने शूघनासो वातप्रमियर् पतयन्ति यह्वाः ।	* इवं * सू° वातः प्रिमयः * यह्वां
	घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्न् ऊर्मिभिर् पिन्वमानः ॥७॥	* * अर्षो * * * भिर्मर्त्य् * *
	अभि प्रवन्त समनेव योषार् कल्याण्य[स्] स्मयमानासो अग्निम् ।	* °वन्ति…
	घृतस्य धारास् समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥८॥	* * * रसन्ति…
	कन्या इव वहतुम् एतवा उ अञ्ज्य् अञ्जाना अभि चाकशीति ।	* * वातमतेतवा उ अन्य जाना * *
	यत्र सोमस् सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते ॥९॥	
	अभ्य् अर्ष[त] सुष्टुतिं गव्यम् आजिम् अस्मासु भद्रा द्रविणानि धत्त ।	* * * * आजम्…
	इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ते ॥१०॥	…प्लवन्ते
	धामन् ते विश्वं भुवनम् अधिश्रितम् अन्तस् समुद्रे हृद्य् अन्तर् आयुषि ।	* * * * °श्रृतम्…
	अपाम् अनीकात् समिथाद् य आभृतस् तम् अश्याम मधुमन्तं त ऊर्मिम् ॥११॥ ॥का° ३॥	* * समिधाद् याभृतस् तपश्यामि * कुर्
ऋ १.९५.१–११	**८.१४**	
	द्वे विरूपे चरत[स्] स्वर्थे अन्यान्या वत्सम् उप धापयेते ।	* °रूप…
	हरिर् अन्यस्यां भवति स्वधावान् शुक्रो अन्यस्यां ददृशे सुवर्चाः ॥१॥	* * * स्वधावां…
	दशेमं त्वष्टुर् जनयन्त गर्भम् अतन्द्रासो युवतयो विभृत्रम् ।	* त्वाष्टुर्…विभृतं
	तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति ॥२॥	* सु°…धीं *
	त्रीणि जाना प्रति भूषन्त्य् अस्य समुद्र एकं दिव्य् एकम् अप्सु ।	* जानात्…
	पूर्वाम् अनु प्र दिशं पार्थिवानाम् ऋतून् प्रशासद् वि दधाव् अनुष्ठु ॥३॥	…ऋभून् * * * *
	क इमं वो निण्यम् आ चिकेत वत्सो मातॄर् जनय[त स्वधाभिः ।	…च्चिकेतु * मातृञ्…

[बह्वीनां गर्भो अपसाम् उपस्थान् महान् कविर् निश् चर]ति स्वधावान् ॥४॥
आविष्ट्यो वर्धते चारुर् आसु जिह्मानाम् ऊर्ध्व[स्] स्वयशा उपस्थे ।
उभे त्वष्टुर् बिभ्यतुर् जायमा[ना]त् प्रतीची सिंहं प्रति जोषयेते ॥५॥
उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुर् एवैः ।
स दक्षाणां दक्षपतिर् बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ॥६॥
उद् यंयमी[ति] सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।
उच् छुक्रम् अत्कम् अजते सिम् अस्मान् नवा मातृभ्यो वसना जहाति ॥७॥
त्वेषं रूपं कृणुत उत्तरं यत् संपृञ्चानस् सदने गोभिर् अद्भिः ।
कविर् बुध्नं परि मर्मृज्यते धीस् सा देवताता समितिर् बभूव ॥८॥
उरु ते ज्रयः पर्य् एतु बुध्नं विरोचमानं महिषस्य धाम ।
विश्वेभिर् अग्ने स्वयशो[भि]र् इद्धो ऽदब्धेभिः पायुभिः पात्व् अस्मान् ॥९॥
धन्वन् स्रोतः कृणुते गातुम् ऊर्मिं शुक्रैर् ऊर्मिभिर् अभि नक्षति क्षाम् ।
विश्वा सनानि जठरेषु धत्ते ऽन्तर् नवासु चरति प्रसूषु ॥१०॥
एवा नो अग्ने समिधा गृणानो रेवत् पावक श्रवसा वि भाहि ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिस् सिन्धुः पृथिवी उत द्यौः ॥११॥
॥का° ४॥

...जिह्मानाम् * स्वयशाम् *
* * विभ्यन्तर् * °चीं * * जोषयते
...वाग्रा * * एवै
* दक्षिणां * बभूवा युञ्जन्ति...
उधं ...सम यजते * रुञ्जन्
* * अस्मद्धुम् * समस्मा * * नसना *
...सदनं * *
* व्रध्वं * समृज्यते...सवितुर् *
* * * पतेषु बध्नं * महिषस्व *
धन्वं * कृणते गार्तम्...
...तुन् * * *
एव * * °ध घृणानो * पावकश्...

८.१५

यो जामदग्न्य इह कौशिक आत्रेय उत काश्यपो यः ।
भारद्वाजा गौतमा ये वासिष्ठास् तेभ्यः प्र ब्रूम इह किल्विषाणि ॥१॥
आगस्त्यो यः काण्वः कुत्सापस्रवणा विश्वरूपा गार्गा मुद्गला अयस्काः? ।
शौनकास् संकृतयो ब्राह्मणा ये न द्रुग्धास् तेभ्यः प्र ब्रूम इह किल्विषाणि ॥२॥
यो नो ऽतिष्ठद् ब्राह्मणो नाधमानेनान्येन? तृप्त उत धैर्येण ।
विश्वे देवा उपद्रष्टारो ऽत्र तस्मिन्न् इषं सं ¿नयां किल्विष्यं? ॥३॥
यारोपयन् किल्विषे ब्राह्मणस्याथा निजीनांसि? बहुधा दुष्कृतानि ।
अनुतिष्ठन् प्रोक्तात्मा नु तन् नि धत्ते तस्मै तद् देवा उत वेशयन्ति ॥४॥
नाश्नीयान् न पिबेत न शयीत न निंशीत जायाम् ।
नोत पुत्रं ब्रह्मकिल्विषे ¿प्रोक्तोदेव तिष्ठेस्वरितस्य पन्था? ॥५॥
शतर्चिनो माध्यमा ये महर्षयः क्षुद्रसूक्तानाम् उत या प्रजेह ।
ऋषीणां यानि जनिमानि विद्म तेभ्यः प्र ब्रूम इह किल्विषाणि ॥६॥
सोदर्याणां पञ्चदशानां शतानां त्रयस्त्रिंशद् उत शिष्यन्तु देवाः ।
एकस्मिन् विद्धे सर्वे ¿रुप्यं त्वद्? ब्राह्मणकिल्विषम् अन्व् अविन्दन् ॥७॥
तस्मै तद् द्रुह्या द्दीदंनायद्? यो नो ऽतिष्ठद् यो नो जातो ऽस्मिन् ।
ब्राह्मणस्य किल्विषं नाथितस्य सोदर्यताम् इच्छतो ब्राह्मणेषु ॥८॥
उत्तिष्ठद् ब्राह्मणास् सं विदध्वं जीतं याचामि पुनर् एतु सर्वम् ।
इन्द्राग्नी विश्वे देवास् ते मे जितं पुनर् आ वर्धयन्तु ॥९॥
स दीर्घम् आयुष् कृणोति सुप्रजायै जिगीषति ।
यो ब्राह्मणस्य ब्राह्मणो हुतोन्नतु? किल्विषे ॥१०॥
नास्य प्रजां शर्वो हन्ति न रुद्रो नाशनिः ।
यो ब्राह्मणस्य ब्राह्मणस् सत्यं वदति किल्विषे ॥११॥
त्वं सोमपीथो जुगुथे नृचक्षा ग्रावभिस् सह ।
यो ब्राह्मणस्यास्तं हृदस् सूर्य इवापालुपत् तमः ॥१२॥
य उत्थाय किल्विषे ब्राह्मणस्यान्नम् ऐच्छन्न् अवायते ।
उतैनं द्यावापृथिवी सं तप्ताम् अथैत्व् ऋतस्य पन्थाम् ॥१३॥ ॥का° ५॥
॥अनु° ३॥

* * यं वसिष्ठास्...
अगस्त्य ...गर्गा * *
...दुग्धास् तथाः * * * *
* * तिष्ठाद्...
°यं...
°ष्ठं * * तं...
°यां * पिवेयं * शैत * निंशैभु *
* * * विप्रस्...
...अन्विन्दं
...जाता *
...याचमि * * *
...°प्रजाये जिगिश्छति
...°नि
यों ब्रह्मर्णस्य ब्राह्मणास्सत्यं वदति किल्विषे
...°चक्षाद् * *
* ब्राब्राह्मणस्यास्तां * सूर्यैवापालुपत् *
...ब्राह्मणस्यांनमैश्छं नवायते
* * * तप्तांमथैत्वक्तस्य *

८.१६

¹शौ ६.२५.३¹ नव च या नवतिश् च रूढा वक्षणा अनु ।

...वक्षणानु

[3]शौ ३[3]	¿इतस् तास् सर्वा नश्यन्त्य् अनुत्ता× प्रत्थङ्गो मयः? ॥१॥	यदस्तस् * णिश्यन्त्य् * * *
[1]शौ २[1]	सप्त च यास् सप्ततिश् चारूढा वक्षणा अनु ।	* ज यस् * * वक्षणानु
[3]शौ २[3]	¿इतस् तास् सर्वा नश्यन्त्य् अनुत्ता× प्रत्थङ्गो मयः? ॥२॥	यदस्तस् * णिश्यत्यानुत्ताः * *
[1]शौ १[1]	पञ्च च या× पञ्चाशच् चारूढा वक्षणा अनु ।	* ज(उपरि न्या) या पञ्चशश् * वक्षणानु
[2]शौ१[3]	¿इतस् तास् सर्वा नश्यन्त्य् अनुत्ता× प्रत्थङ्गो मयः? ॥३॥	यदस् तास् सर्व…
शौ २.३३.५[1.2]	ऊरुभ्यां ते [अ]ष्ठीवद्भ्यां पार्ष्णिभ्यां भंससः ।	* द्वे … भंसमः
	स्त्रिया ¿जारैव पुत्थगीन? प्र मृणीमसि ॥४॥	
	¿अनसूत्ताम् अहनेषु पूक्ष्णां पापीयां शमिद्धतीम्? ।	
	ताम् एतां दस्यूनां दासीं प्र दहेतश् चुकाकणि? ॥५॥	* * तस्यूनां दसीं * दहतश् *
	¿प्र पताति सुकङ्गालि शुके× कुकीतको यथा ।	
	¿स्वक्के ते त्रिपुं धुक्षामि सा न शिष्यसि पुत्थगी? ॥६॥	
	यदास्यास् सुके दहेद् यदा मूर्धानम् अग्निना ।	* * दहेभ्यदा(प्रान्ते यदा) …
	ताम् एतां दस्यूनां दासीं ¿प्रत्थगेन लयिष्यते? ॥७॥	* एता तस्यूना …
	संवत्सरम् अजरो सुरेभ्य× ¿पतं क्रिमीत्? ।	
	यत्र क्षेत्रस्य दुर्गन्धि तत् त एतन् न्यञ्चनम् ॥८॥	…उत् तेतं *
	नैतत् तव मातृणं स्थां न त एतन् न्यञ्चनम् ।	* * * * * तेत *
	अस्माकम् एतद् वीरेभ्यो देवै× प्रजननं कृतम् ॥९॥	
	¿गिरोते ऽसि पूतम् उदकं हिमवत्सु तत्रोप प्रस्कद्य	
	¿नृतुप्रजामियूथेगपुत्थगी? ॥१०॥	
	स त्वं गोभिर् अश्वै× प्रजया प्रजननं भव ।	
	यो मा तत्र प्राहैषीर् यत्र जीवन्तु भद्रया ॥११॥ ॥का° १॥	* * * प्राहीषी…भद्रयः
शौ १९.१९.१–११	८.१७	
	मित्र× पृथिव्योद् अक्रामत् तां पुरं प्र णयामि वः ।	…व
	ताम् आ विशत तां प्र विशत सा व[श्] शर्म च वर्म च यच्छतु ॥१॥	* * विशत् * * विशतु श्रा…
	वायुर् अन्तरिक्षेणोद् [अक्रामत् तां पुरं प्र णयामि वः ।	* अन्तरन्तरिक्षेणोस्…
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥२॥	
	सूर्यो दिवोद् [अक्रामत् तां पुरं प्र णयामि वः ।	* दिवश्…
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥३॥	
	चन्द्रमा नक्षत्रैर् उद् [अक्रामत् तां पुरं प्र णयामि वः ।	* * उ
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥४॥	
	सोम ओषधीभिर् उद् [अक्रामत् तां पुरं प्र णयामि वः ।	* ओषधीभृत्
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥५॥	
	यज्ञो दक्षिणाभिर् उद् [अक्रामत् तां पुरं प्र णयामि वः ।	* दक्षिणाभृत्
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥६॥	
	समुद्रो नदीभिर् उद् [अक्रामत् तां पुरं प्र णयामि वः ।	* नदीभृत्
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥७॥	
	ब्रह्म ब्रह्मचारिभिर् उद् [अक्रामत् तां पुरं प्र णयामि वः ।	* ब्रह्मचारिभृत्
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥८॥	
	इन्द्रो वीर्येणोद् अक्रामत् तां [पुरं प्र णयामि वः ।	
	[ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु] ॥९॥	
	देवा अमृतेनोद् अक्रामंस् तां पुरं प्र णयामि वः ।	देवामृते° अक्रामन्…व
	ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु ॥१०॥	ते मा विशन्तु ते मा प्र विशन्तु ते * चर्म * * *
	प्रजापति× प्रजाभिर् उद् अक्रामत् तां पुरं प्र णयामि वः ।	…व [यच्छतु
	ताम् आ विशत तां प्र विशत सा वश् शर्म च वर्म च यच्छतु ॥११॥ ॥का° २॥	* * विशन्तु ता * विशन्तु…
	८.१८	
	संव्यजन्त× प्रकृषन्तो यद् वो देवा उपोचिरे ।	सव्यञ्जन्त× °न्त…
	¿ताम् एभ्यस् सत्याम् आशिम् इन्द्र खल्वान् समृद्धयः? ॥१॥	°ल्वां *

	अनड्वाहस् सत्यावानस् सीरं कृणोतु मे वचः ।	...शृणोतु * *
	अत्राहीतद्? वि जायते तत् पर्जन्यो ऽभि वीवृषत् ॥२॥	...वोवृषत्
	दिव्या·आपो वै शाकरीर् अनु [र]मन्तु गह्वरे ।	दिव्यापो व शक°...
	ऊर्जस्वती[र्] घृतवतीः पयस्वतीर् दृशे भवथ मा गुहा ॥३॥	
[२]पै ८.१२.६[३]	उद् एहि वाजिनीवति पूर्णपात्रा त्विषीमती ।	
	दुहाना पोषं रक्षता? कामम् एषां सम् आ पृणः ॥४॥	* पूष...
	अहिंसिता फलवती शतवल्शा वि रोहतु ।	अहिंसीता * °वल्शं...
	इमं सहस्रभोगम् अस्या इन्द्र उपावतु ॥५॥	* °भोगास्या * *
कौ २०.५	अश्विना फलं कल्पयेताम् उपावतु बृहस्पतिः ।	* फालं...
	यथासद् बहुधान्यम् अयक्ष्मं बहुपूरुषम् ॥६॥	...°पौरुषं
[३]पै ८.११.९[२]	यद् वो देवा उपोचिर इह भूयस् स्याद् इति ।	* * * उपोशिरे...
	इह ताम् उत् पृणां वयं देवीम् उप ह्वयामहे ॥७॥	
	इदं व उत् पृणाद् इति स्फातिं व उत् पृणाद् इति ।	
	राशिं मे वर्धयाद् इति ¿स्फातिंकारो बहुकारस् स्फिरस्फोटाय माक्षिकः? ॥८॥	* * * * स्फातिंचकारो °कार °स्फोष्टय म°
	अस्मिन् धामन् न्युप्यते यवो व्रीहिर् अथो तिलः ।	अस्मि धां नु°...
	तस्य गृह्णीत यत् कृतं परिक्षाय? चतुश्शतम् ॥९॥	
	शर्कार्यवन्नयावश्वकैवृत्? किं च यद् वृषे ।	
	तद् वै स्फातिर् उपायती सर्वम् एवातिरिच्यसि? ॥१०॥	
	सहन् जने परा जहि सहस्रपोषमन्दये ।	सहं... सहस्रा°
	वह्नी न ओषधे भव समुद्रस्येव संस्रवः ॥११॥ ॥का°३॥	* नोषधी... °व

८.१९

	आज्याद् अजस् सम् अभवद् देशेभ्य ओदनाय ।	
	येनातिपश्यन् बृहस्पतिस् स वै पञ्चौदनो ऽभवत् ॥१॥	...पन्चोदनो *
	चतुर्भियतां? सम् अभव ओदनस् त्वं बृहस्पते ।	
	अज [आ]ज्याज् जातस् स एषां पञ्चमो भव ॥२॥	
	धूमेन दिवम् आप्नोत्य् अन्तरिक्षम् अथोष्मणा ।	* * * अन्त्यरि° अधो°
	दिश आप्नोतु चक्षुषा अजः पञ्चौदनस् सवः ॥३॥	दिशाप्नोतु * * पञ्चमोदनस्सवः
	यत् ते माता यत् ते पिता भ्रातरो यच् च ते स्वसा ।	...मे स्वा
	अजं पञ्चौदनं पक्त्वा सर्वे तम् उप जीवत ॥४॥	* पन्चोदनं... जीवित
शौ १८.३.७२	ये ते पूर्वे परागता अपरे पितरश् च ये ।	यत् * * परागतापरे...
	तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ॥५॥	* * कुल्लीतु °धारां विनृतीं
	ये सर्वदा ददति ये वारं·चरन्त्य् ओदनम् ।	* * ददत्येवार * *
	ते वै यमस्य राज्याद् उत्तरे लोक आसते ॥६॥	...लोकासते
	नातिरात्र आप्नोतु नैनम् आप्नोत्य् उक्थ्यः ।	°रात्राप्नोतु...
	नाग्निष्टोम आप्नोत्य् अजं पञ्चौदनं सवम् ॥७॥	°ष्टोमाप्नोत्य्...
	दशरात्रेण सम्यतो द्वादशाहेन कल्पते ।	
	दीर्घमात्रेण सम्यतो [अ]जः पञ्चौदनस् सवः ॥८॥	
	य[द्] एषां बर्हिष्यं सर्वं यन् नष्टं यच् च संयतम् ।	...सयतं
	यच् च तेनोपायति स एषां पञ्चमो भव ॥९॥	* * स्ते° य * * *
शौ ९.५.२७	या पूर्वं पतिं वित्त्वा यथान्यं विन्दते ऽपरम् ।	...वित्वा यथान्नं * *
[४]शौ ददातो न वि योषतः	पञ्चौदनं च ताव् अजं पचतो न व्य् अञ्चतः ॥१०॥	* * * अतं * * * आंचतः
शौ २८	समानलोको भवति पुनर्भुवापरः पतिः ।	* * पुनर्भवा° *
	अजं च पञ्चौदनं दक्षिणाज्योतिषं ददत् ॥११॥ ॥का°४॥	...दक्षिण्य° *

८.२०

	सूर्यो मा वर्चसोक्षतूक्षताम् अश्विनोभा ।	* * वर्चसोक्षतूक्षताम् *
	आदित्य ऊर्ध्व उत्तरन्न् असौ मा वर्चसोक्षतु ॥१॥	* * उत्तरं...
	वर्चसा मां पितुर्? अग्निर् वर्चसा मा बृहस्पतिः ।	

	सुरायास् सिच्यमानायाऽ कीलालो वर्चसा येन ।	...कीलाल वर्चसेनसा
	तेन माम् अश्विनोभा उक्षतां पुष्करस्रजा ॥२॥	
	वर्चस्वन् मे मुखम् अस्तु रोचमानं विषासहि ।	वर्चस्वान्...
	यो मा हिरण्यवर्चसं कृणोमि पश्यतां प्रियम् ॥३॥	...°ता *
	मधोर् अहं मधुतरो मधुमान् मधुमत्तरः ।	...°मां *
	माम् अनु प्र विशतु वर्च ऋषभो वाशिताम् इव ॥४॥	* * * विशन्तु...वापि° *
	¿यदमांजनमानमवर्चस्वसा कनिक्रदं? ।	
	अथा कनिक्रदच् चराणि वर्चसा च भगेन च ॥५॥	यथा कनिक्रदश्...
	वर्चसाग्नि[र्] मा ददाति वर्चसा ददाति सूर्यः ।	* * दधति वर्चसो यदति *
	यावद् वर्चो गोर् हिरण्यस्य तावन् मे वर्चो भूयात् ॥६॥	* * गोर्द्धिर्हिरण्यस्...
	यावत् त्वं देव सूर्योद्यन्न् अभ्यवपश्यसि ।	...अभैव°
	तावन् मा वर्चसाभ्य् अवपश्य ॥७॥	
	पूर्णो भगस्याहं भूत्वा तक्षन् वर्चसो रथम् ।	पर्णो * * उक्षं...
	स मा वहतु सर्वदायुष्मन्तं सुवर्चसम् ॥८॥	
	भगेनाहं परिहितो वर्चसा द्रविणेन च ।	
	यथा चराणि सर्वदा रोचमानो विभावसुः ॥९॥	...°नं *
	एवा मा भग आगमद् एवा मा वर्च आगमत् ।	यवा * भगागमद् * * वर्चागमत्
	एवा मा तेज आगमद् एवा मा यश आगमत् ॥१०॥	* * तेजागमद् * * यशागमत्
	हिरण्ययेन चक्रेण भगस्यापिहितो गृहः ।	हिरण्येन * °पिहतो *
	तं युग्जापि? ब्रह्मणा तस्य मे दत्ताम् अश्विना दत्तां मे पुष्करस्रजा ॥११॥	...दत्तम् * दत्तं * °जः
	॥का° ५॥ ॥अनु° ४॥	
	इत्यथर्ववेदे पैप्पलादशाखायाम् अष्टम् ८ काण्डस् समाप्तः ॥	इत्यथर्वणिक पै°...
शौ ५.२७.१–१२, का १८.१७ [मै २.१२.६ तै ४.१.८ इत्यादि	९.१	
	ऊर्ध्वा अस्य समिधो भवन्त्य् ऊर्ध्वा शुक्रा शोचींष्य् अग्नेः ।	{नवमं आरम्भ ८ कृताः । ॐ नमो नारायणाय । ॐ नमश्शारिकाभगवत्यै: ॐ नमस्सरस्वत्यैः ॥ ॐ ऊर्ध्वा...शुचींष्य् *
	द्युमत्तमा सुप्रतीकस्य सूनोः ॥१॥	द्यू°...
	तनूनपाद् असुरो विश्ववेदा देवो देवेषु देवः ।	°पादम्भसुरो विश्ववेदाः...
	पथो ऽयुक्त? मध्वा घृतेन मध्वा यज्ञं नक्षति प्रीणानः ॥२॥	
	नराशंसो ऽग्निस् सुकृद् देवस् सविता विश्ववारः ।	नुराशंसस्सुक्षद् * * *
	अच्छायम् एति शवसा घृतेन ॥३॥	
	ईडे वह्निं नमसाग्निं स्रुचो ऽध्वरेषु प्रयत्सु ।	* * नमसाग्नि...प्रयुत्सु
	स्रुवे? यक्षद् अस्य महिमानम् अग्नेः ॥४॥	* क्ष्तस्य * अग्ने
	स्वनमिन्द्रसुप्रयुत्सु? ।	
	वसुश् चेतिष्ठो वसुधातमश् च ॥५॥	
	द्वारो देवीर् अन्व् अस्य विश्वेद् व्रता ददन्ते ऽग्नेः ।	* * अन्य्...
	उरुव्यचसा धाम्ना पत्यमानाः ॥६॥	°व्यचस्व * पच्य°
	ते [अ]स्य वृषाणो? दिव्या न योना उषसानक्ता ।	
	इमं यज्ञम् अवताम् अध्वरं नः ॥७॥	
	दैवा होतार इमम् अध्वरं नो अग्नेर् जिह्वयाभि गृणीतम् ।	...जिह्वेभि गृणीतः
	कृणुतं नस् स्विष्टिम् ॥८॥	कृणुता न *
	तिस्रो देवीर् बर्हिर् एदं सदन्त्व् इडा सरस्वती महाभारती गृणानाः ॥९॥	...°ना
	तन् नस् तुरीपम् अद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् ।	तं...
	रायस् पोषं वि ष्यतु नाभिम् अस्मे ॥१०॥	* * विश्वत नाभिमस्महे

	वनस्पते ऽव सृजा रराणस् सुमना देवेभ्यः ।	
	अग्निर् हव्यं शमिता सूदयाति ॥११॥	…सूदयति
	अग्ने स्वाहा कृणुहि जातवेद इन्द्राय भागम् ।	
	विश्वे देवा हविर् इदं जुषन्ताम् ॥१२॥ ॥का॰१॥	
शौ ५.२६.१,२,३,५,४,६,७,८,[११,१०,९,१२	९.२	
	यजूंषि यज्ञे समि[धस्] स्वाहाग्निः प्रविद्वान् इह वो युनक्तु ॥१॥	यजुंषि * * स्वाहाग्नेः…
	युनक्तु देवस् सविता प्रजानन्न् अस्मिन् यज्ञे सयुज[स्] स्वाहा ॥२॥	* * * ॰नन् यस्मिन्…
	इन्द्र उक्थामदानि यज्ञे अस्मिन् प्रविद्वान् युनक्तु सयुजस् स्वाहा ॥३॥	* युक्था॰…प्रनक्तु * *
	छन्दांसि यज्ञे मरुतस् स्वाहा मातेव पुत्रं पिपृतेह युक्ताः ॥४॥	* यज्ञं…पिपृतेष्यक्त्वा
	प्रैषा निविद आप्रियो यजूंषि शिष्टाः पत्नीभिर् वहतेह युक्ताः ॥५॥	* नविदाप्रियो…वातेहि युक्ता
	एयम् अगन् बर्हिषा प्रोक्षणीभिर् यज्ञं तन्वानादितिस् स्वाहा ॥६॥	येम् अगं * प्रोक्षणेमिर्…
	विष्णुर् युनक्तु बहुधा तपांस्य् अस्मिन् यज्ञे सयुजस् स्वाहा ॥७॥	* * * उपास्मिन् * * *
	त्वष्टा युनक्तु बहुधा विरूपा अस्मिन् [यज्ञे सयुजस् स्वाहा] ॥८॥	…विरूपास्मिन्
	इन्द्रो युनक्तु बहुधा वीर्याण्य् अस्मिन् [यज्ञे सयुजस् स्वाहा] ॥९॥	
	सोमो युनक्तु बहुधा पयांस्य् अस्मिन् [यज्ञे सयुजस् स्वाहा] ॥१०॥	
	भगो युनक्त्व् आशिषो न्व् अस्मा अस्मिन् यज्ञे सयुज[स्] स्वाहा ॥११॥	* * * न्य् अस्मास्मिन्…
	अश्विना ब्रह्मणेतम् अर्वाग् वषट्कारेण यज्ञं वर्धयन्तौ ।	…वर्धयन्तौ स्वाहा
	बृहस्पते ब्रह्मणेह्य् अर्वाङ् यज्ञो अयं स्वर् इदं यजमानाय धेहि स्वाहा ॥१२॥ ॥का॰२॥	* ब्राह्मणोष्यर्वान् यज्ञं वयं स्वरितं * * *
	९.३	
	आपः पुनन्तु वरुणः पुनात्व् अयं च यः पवते विश्वदानीम् ।	
	यज्ञो भगो अधिवक्ताधिवक्ताग्निश् च नः पावयेतां सूर्यश् च ॥१॥	* * ॰वन्ताम्निश् * * * सूर्यस्य
कौ ३३.९[१.२]	दशशीर्षो दशजिह्व आ रभे वीरुधो भिषक् ।	* ॰जिह्वारभे वीरुको *
	मा ते रिषन् खनिता यस्मै च त्वा खनामसि ॥२॥	* * रिषं खनितास्मै * * *
	दशरात्रेण किलासस्य वीरुधा वेद भेषजम् ।	* किलमस्य…
	यतस् तद् अभ्रियाखनं किलासं नाशयामसि ॥३॥	* तुद॰…नाशयामि ते
	अप्स्व् अन्या वि रोहति धन्वन्य् अन्याधि तिष्ठति ।	…धत्वंन् * *
	किलासम् अन्या नीनशद् वर्चसान्या सम् अज्ञतु ॥४॥	* * नीनीनशद्…
	आज्येन घृतेन जुहोमि किलासभेषजम् ।	
	वीरुधाम् अग्नेस् संकाशे किलासं नानु विद्यते ॥५॥	वीरुधान्…
	पिशङ्गं रूपे भवति कल्माषम् उत संदृशि ।	* रूपय * ककल्माषम्…
	किलास नश्येतः परः प्र त्वा धक्षामि वीरुधा ॥६॥	…दक्षामि *
	यानि पृथग् उत्पतन्ति नक्षत्राणीव संदृशे ।	…॰दृशि
	किलासं सर्वं नाशयन् ¿नो भीवाद्येम? वीरुधा ॥७॥	* * नाशयं…
[१]शौ २.१४.५[२]	यदि वा पुरुषेषिताः किलासं पर्याजगन् ।	* * ॰तात् किलास ॰गं
	नमो नमस्यामो देवान् प्रत्यक् कर्तारम् ऋच्छतु ॥८॥	
	शीर्ष्णस् ते स्कन्धेभ्यो ललाटात् परि कर्णयोः ।	* * ॰न्देभ्यो…
	ओषध्या [वर्षजूतया] किलासं नाशयामि ते ।	
	शस्ता वर्णा इत्य् अनरातिस्? सहौषधिः ॥९॥	…सहोषधी
पै ४.७.२[१.१]	ग्रीवाभ्यस् त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।	* ता…
	[ओषध्या वर्षजूतया किलासं नाशयामि ते ।	
	[शस्ता वर्णा इत्य् अनरातिस्? सहौषधिः] ॥१०॥	
	अंसाभ्यां ते दोर्भ्यां बाहुभ्यां परि हस्तयोः ।	
	[ओषध्या वर्षजूतया किलासं नाशयामि ते ।	
	[शस्ता वर्णा इत्य् अनरातिस्? सहौषधिः] ॥११॥	
	पृष्टिभ्यस्ते पार्श्वाभ्यां श्रोणिभ्यां परि भंससः ।	…भंससे
	[ओषध्या वर्षजूतया किलासं नाशयामि ते ।	
	[शस्ता वर्णा इत्य् अनरातिस्? सहौषधिः] ॥१२॥	

पै ४.७.६[१.२]	ऊरुभ्यां ते [अ]ष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।	ऊरूभ्यां द्वे … प्रापदाभ्यां
	ओषध्या वर्षजूतया किलासं नाशयामि ते ।	ओषधा … नाशयाम से
	शस्ता वर्णा इत्य् अनुरोतिस्? सहौषधिः ॥१३॥ ॥का° ३॥	…°षधि
	९.४	
	सहैव वो हृदयानि सह विज्ञानम् अस्तु वः ।	
	सहेन्द्रो वृत्रहा करत् सह देवो बृहस्पतिः ॥१॥	सेन्द्रो …
	समानम् अस्तु वो हृदयं समानम् उत वो मनः ।	… रो * (प्रान्ते समाना हृदयं मनः पाठः)
	समानम् अग्निर् वो देवः ॥२॥	
	समानं? राष्ट्रम् उपाध्वं सं जानीध्वं सहृदयाः ।	सा … सहहृदयात्
	सर्वे संमनम्? अस्तु वः ॥३॥	… अस्त व
	नष्टो वो मन्युर् जीर्णे ऋष्यात् सह जीवाथ भद्रया ।	… भद्रयः
	यथा पुत्र× प्रवावद× पितृभ्यां वदतु प्रियम् ॥४॥	* * प्रवावद …
	सहैव वो धान्यानि समाना× पशवश् च वः ।	
	सह पृथिव्यां वीरुधस् सह वस् सन्त्व् ओषधीः ॥५॥	
	सह दीक्षा सह यज्ञो विवाहो वस् सहमतिः ।	… सहामतिः
	सह प्रफर्वा नृत्यन्ति सह वस् स्त्रिय [आ]सताम् ॥६॥	… व * *
	सहै[व] वो वीर्याणि सत्यानि रन्धयाध्वै ।	… सात्यानि *
	सह पतत्रिणीम् इषुम् अन्यस्मै हेतिम् अस्यत ॥७॥	सा …
	सं वाशयामि सुमतिं मधुना ¿वाचमां रिरषम्? ।	* वश्यामि …
	युष्माकम् अन्ये शृण्वन्तूदितं संगथे जने ॥८॥	
	युष्मान् अमित्रा वृणुतां युष्मान् प्रतिजना उत ।	* * वृणुता निष्मान * *
	युष्मे ज्ञातित्वं प्रेष्ठंत्व्? अमृतं मर्त्याय च ॥९॥	युष्मै …
	सं ¿समिद्यस् समाकरं? सह यूथा गवाम् इव ।	* * * सा …
	समानम् अस्तु वो मनो ज्येष्ठं विज्ञानम् अन्वतः? ॥१०॥	
	यद् ईं यद् एषां हृदयं तद् एषां हृदये भवत् ।	* इं …
	अथो यद् एषां हृदं तद् एषां हृदि श्रितम् ॥११॥	… श्रुतं
	समानम् अस्तु वो मनश् श्रेष्ठं विज्ञानम् अन्वतः? ।	
	यद् ईं यद् एषां मन एषां यानि मनांसि च ।	* इं …
	मद्र्यग् एन्द्र तच् छृणु रथे पादाव् इवाहितौ ॥१२॥ ॥का° ४॥	मभ्रियग् …
शौ १९.६.१–६,९–१६ ऋ १०.[९०.१ इत्यादि	९.५	
	सहस्रबाहु× पुरुषस् सहस्राक्षस् सहस्रपात् ।	…°क्षाम् *
	स भूमिं विश्वतो वृत्वात्य् अतिष्ठद् दशाङ्गुलम् ॥१॥	
	त्रिभि× पद्भिर् द्याम् अरोहत् पादो ऽस्येहाभवत् पुनः ।	… पाद * *
	तथा व्य् अक्रामद् विष्वङ् अशनानशने [अनु] ॥२॥	* * क्रामुद् विष्यं अशनाशयन्
	तावन्तो [अ]स्य महिमानस् ततो ज्यायांश् च पूरुषः ।	… पुरुषः
	पादो ऽस्य विश्वा भूतानि त्रिपाद् अस्यामृतं दिवि ॥३॥	पाद …
	पुरुष एवेदं सर्वं यद् भूतं यच् च भव्यम् ।	
	उतामृतत्वस्येश्वरो यद् अन्येनाभवत् सह ॥४॥	… सहः
	यत् पुरुषं व्यदधु× कतिधा व्यकल्पयन् ।	… व्यमकल्पयन्
	मुखं किम् अस्य किं बाहू किम् ऊरू पादाव् उच्येते ॥५॥	
	ब्राह्मणो ऽस्य मुखम् आसीद् बाहू राजन्यो ऽभवत् ।	* * * आसीत …
	मध्यं तद् अस्य यद् वैश्य× पद्भ्यां शूद्रो अजायत ॥६॥	* * अस्तु …
	विराड् अग्रे सम् अभवद् विराजो अधि पूरुषः ।	* आग्रे * अभरद् * * पौरुषात्
	स जातो अत्य् अरिच्यत पश्चाद् भूमिम् अथो पुरः ॥७॥	* * अभ्य् … पुरा
	यत् पुरुषेण हविषा देवा यज्ञम् अतन्वत ।	
	वसन्तो अस्यासीद् आज्यं ग्रीष्म इध्मश् शरद् धविः ॥८॥	… इध्माश् * *
	तं यज्ञं प्रावृषा प्रौक्षन् पुरुषं जातम् अग्रशः ।	* * °वृषात् प्रौक्षं … अक्रमः
	तेन देवा अयजन्त साध्या वसवश् च ये ॥९॥	
	तस्माद् अश्वा अजायन्त ये च के चोभयादतः ।	

	गावो ह जज्ञिरे तस्मात् तस्माज् जाता अजावयः ॥१०॥	
	तस्माद् यज्ञात् सर्वहुत ऋचस् सामानि जज्ञिरे ।	
	छन्दांसि जज्ञिरे तस्माद् यजुस् तस्माद् अजायत ॥११॥	छन्दो ह जज्ञिरे...
	तस्माद् यज्ञात् सर्वहुतस् संभृतं पृषदाज्यम् ।	
	पशूंस् तां[श्] चक्रिरे वायव्यान् आरण्यान् ग्राम्यांश् च ये ॥१२॥	
	सप्तास्यासन् परिधयस् त्रि[स्] सप्त समिधᳵ कृताः ।	सप्तास्यास्सन्... धाᳵ *
	देवा [यद्] यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥१३॥	
	मूर्ध्नो देवस्य बृहतो अंशवस् [सप्त] सप्ततिः ।	* * * अंसवस्...
	राज्ञस् सोमस्याजायन्त जातस्य पुरुषाद् अधि ॥१४॥ ॥का°५॥ ॥अनु°१॥	राजस्...
	९.६	
	इमां खनाम्य् ओषधिम् अदृष्टदहनीम् अहम् ।	...°महनीम् *
	¿अश्वस्यावो ददाति त्वा वैरूपो वाजिनीवति? ॥१॥	
	नादृष्टा वो जिह्वास् सन्ति न दन्ता हन्वोर् अधि ।	...हंनोर् *
[1]कौ ११६.७[2]	नापि मध्यन्यं? शिरस् ते यूयं किं करिष्यथ ॥२॥	...करिष्यतः ॥ ॥ ओं ते यूयं किं करिष्यतः
[2]कौ ७[3]	¿इन्द्रामित्रा इन्द्रं हता नु वह्यास्ति नुश्चनं? ।	ओं इन्द्रा°...
	इन्द्रो वस् सर्वासां साकं शक्रस् तृणेढु? वृत्रहा ॥३॥	...तृणेपु *
	अश्वतरान् अयश्शफान् यान् इन्द्रो अधि तिष्ठति ।	°रां * या...
	तैर् वो ऽपि नह्येते ¿मुखान्यदु च सर्पिणः? ॥४॥	त्वैर्...
	अपिनद्धम् अदृष्टानां मुखं पादं दृतेर् इव ।	* °ना * पाद...
	उतैषां जिह्वा जिषून्ता? न दन्ता हन्वोर् अधि ॥५॥	...हंनोर् *
	¿अवधिकम् अस्रगादा न्यक्रोडादालिप्सत ।	
	¿अभीत्सं सर्वेषाम् आंत्वानि? ये दृष्टाᳵ पृथिवीक्षितः ॥६॥	...°क्षिकः
ऋ १.१९१.३ । [3]ऋ शरासः कु-	¿ऋष्यासᳵ पौरुषाक्षो? दर्भासो वैरिणा उत ।	...वीरणा *
[4]ऋ ७[4] [शरासः	मौञ्जा अदृष्टास् सैर्यास् सर्वे साकं नि जस्यत ॥७॥	...जास्यच
	अदृष्टानां सप्त जाता पृथिवी निषसे मही ।	
	तान् इन्द्रो बाहुभ्यां सर्वान् शक्रो न्व् अपावपत् ॥८॥	...सर्वा * नु पावपत्
	व्य् अस्यन्तु सप्त जाता अदृष्टाᳵ पुरुषादिस? ।	वय् * * जातादृष्टाᳵ *
	ग्राव्णांशून् इव सोमस्य तान् अहं सर्वान् प्र मृणीमसि ॥९॥	°सून् * * तयाहं...
	[य] आत्मजा ये वास्थिजा अरुषा य उतोदिम? ।	...वस्तिजारुषा * *
	तेभ्यᳵ खनाम्य् ओषधिं तेभ्यो बिम्बी वधᳵ कृता ॥१०॥	...कृत
	अदृष्टेभ्यस् तरुणेभ्यो धवेभ्यस्? स्थविरेभ्यः ।	...धवभ्य *
	अहार्षम् उग्राम् ओषाधिं तेभ्यो बिम्बी वधᳵ कृता ॥११॥	अहर्षम्...कृत
	ये च दृष्टा ये चादृष्टास् तितीलाम्भ्यलुनांश्? च ये ।	
	तेनाग्ने सर्वान् सं दह क्रिमीन् अनेजातो जहि ॥१२॥ ॥का°१॥	...अनेजितो *
	९.७	
	¿शीतजलायत शीतावात उपागन्तु? हिमेनाग्निनावृतः ।	
	हिमेनाग्निᳵ परीवृतस् तं त्वा देवा ¿उरुधंनात् समुद्रियम् अजावयः? ॥१॥	* °वृता त...
	हिमो जघान वो ऽजं हिमो वक्षन् हि मत्सति? ।	...वक्षं * *
	हिमाद् अधि प्र यामसि हिमे ऽग्निविमोचनम् ॥२॥	...ग्यविमोचनं
	¿हिमवटं शधरनर्धेन्द्रस् सप्तवध्रे ।	
	¿अवका तत्र रोहतु खले परि बिलं तव? ॥३॥	
	अर्चिष् टे अग्ने प्रथमम् अङ्गानाम् अपरम् उत ।	...अपरां *
	गृभ्णामि ब्रह्मणा नाम धामधा[म] परुष्परुः ॥४॥	गृह्णामि ... परुष्परुः
	शीतिका नाम ते माता जलाषो नाम ते पिता ।	
	इह त्वम् अन्तरा भव वाहीकम् अस्तु यद् रपः ॥५॥	...वाहीकुम् * * रपा
	हिमे जातोदके वृद्धा सिन्धुतस् पर्याभृता ।	...°भृत
	तया ते अग्रभं नामाश्वम् इवाश्वाभिधान्या ॥६॥	...°पिधान्या
	आमा नामास्य् ओषधे तस्यास् ते नाम जग्रभ ।	...त * जग्रभः

	अगस्त्यस्य पुत्रासो मा विधातु? पुरुषान् मम ॥७॥	
	मा नो अग्ने तन्वं मा वाससो ऽस्य रीरिषः ॥८॥	...वार्सं स्य *
	यं त्वा समुद्रज वयम् आरोहाम स्वस्तये ।	* ता...
	¿दिवस्तादावापद् रुन्धारात् समुद्रिया? ॥९॥	
	अप हिरण्यकुम्भो हरितो ऽवकाभिः ।	* हिरण॰...
	परिवृते तेनाग्निं शमयामसि ॥१०॥	* ॰ग्नीं *
	शमयाम्य् अर्चिर् अग्ने शिषस्तस्तुमविधा? ।	
	गृभीते द्यावापृथिवी गृभीतं पार्थिवं रजः ॥११॥	
	नि मुञ्जेषु यद् उदकं नि नडेषु यद् अन्तरम् ।	...नद्रे(प्रान्ते भ्रे)पु * *
	यत् समुद्रे यत् सिन्धौ तेनाग्निं शमयामसि ॥१२॥	...तेनाग्न्यं *
	वेतसस्यावकाया? नडस्य वीरणस्य च ।	
	रोहीतकस्य वृक्षस्याग्निशमनम् उद् धरे ॥१३॥	
	¿आयती उत जार्यो? वि ते हरन्तु यद् रपः ।	
	परायती× परावतं परा वहन्तु यत् तपः ॥१४॥	
शौ ६.१०६.३[१.२]	हिमस्य त्वा जरायुणाग्ने परा व्ययामसि ।	...पर *
	शीतिके शीतिम् इत् करो हिमके हिमम् इत् करः ॥१५॥ ॥का॰२॥	...किर

९.८

	अक्रुण्वत लाङ्गलेन पद्वता पथयिष्णुना ।	अक्रुण्वता...
	लाङ्गूलगृह्याचर्कृषुर् वृकेण यवम् अश्विना ॥१॥	॰गृहचरक्रपुर् वृकेणैवम् *
शौ ६.३०.१	देवा एतं मधुना संयुक्तं यवं सरस्वत्याम् अधि मणाव् अचर्कृषुः ।	...अधु * अचरक्रपु
	इन्द्र आसीत् सीरपतिश् शतक्रतु× कीनाशा आसन् मरुतस् सुदानवः ॥२॥	* * सेरपतिश् * कनीशासर्...
	हिरण्मयं कलमं सुदानवो दिव्यया कृतम् अवाभृतम् अश्विना सारघं मधु ।	
	ततो यवो व्य् अरोहत् सो ऽभवद् विषदूषणः ॥३॥	* * विरोहत् * * ॰दूषणा
पै ९.११.११	यवावांयांसरघाय×पृषायमश्वाभरत्?	
	[ततो यवो व्य् अरोहत् सो ऽभवद् विषदूषणः] ॥४॥	
	यद् वृकं मधुपावनं सं वर्धयतम्? अश्विना ।	* * ॰पावान सवावयत्तम् *
	[ततो यवो व्य् अरोहत् सो ऽभवद् विषदूषणः] ॥५॥	
	कैरण्डा नाम सरथो वृकस्य संस्याधि? ।	
	ततो यवो व्य् अरोहत् सो ऽभवद् विषदूषणः ॥६॥	* यतो विरोहत्... ॰दूषणाः
	यद् अस्य ¿भरथो मधु सरघा सर्थश् चरत्? ।	...चनत्
	सधस् तु सर्वतो यवं पुनर् आ धत्तम् अश्विना ॥७॥	* * * युवं...
	यो वां दिग्धविद्धो ऽहिदष्ट उपाचरत् ।	* वं * हिदेष्टोपाचरत्
	तीर्थे रध्रम् इव मज्जन्तम् उत् तं भरतम् अश्विना ॥८॥ ॥का॰३॥	...॰नाः

९.९

	स यं वहन्त्य् अष्टायोगा षड्योगा यं चतुर्गवाः ।	...॰वा
	सर्वे ते विषं वि बाधन्ताम् उग्रो मध्यमशीर् इव ॥१॥	...धाताम् * * *
	यस्य यव प्र सर्पस्य् अङ्गमङ्गं परुष्परुः ।	यस्यैव...
	तस्माद् विषं वि बाधस उग्रो मध्यमशीर् इव ॥२॥	* * * बाधस्व...
	शकंलंचनते? यवो ऽन्यान् हन्त्य् ओषधिः ।	* युवा * * *
	यवैद् यावयद् गोर् अश्वात् पुरुषाद् विषम् ॥३॥	* यावयायद्...
	यवो राजा यवो भिषग् यवस्य महिमा महान् ।	
	यवस्य मन्थं पपिवान् इन्द्रश् चकार वीर्यम् ॥४॥	
	आ भरामृतं घृतस्य [घृतस्य] पुष्पम् आ भर ।	...रभ
	अनभ्रिखातौषधिर् इदं दूषयद् विषम् ॥५॥	अनभ्रिषातोषधै...
	इहायन्तु दिग्धविद्धा[श्] शूद्रा राजन्या उत ।	
	चक्षुर् मे सर्वा दृश्यते [या]यन्तु कदा पुनः ॥६॥ ॥का॰४॥	

९.१०

	जीवातवे न मर्तवे शिरस् त आ रभामहे	...तारंभामहे

पै २.२.३$^{३.४}$	रसं विषस्य नाविदम् ऊध्नः फेनम् अदन्न् इव ॥१॥	…उध्नः * * *
	भूम्या मध्याद् दिवो मध्याद् भूम्या मध्याद् अथो दिवः ।	…मध्या भूम्यां त्वाद् * *
	मध्ये पृथिव्या यद् विषं तद् वाचा दूषयामसि ॥२॥	
	अश्वत्थे निहितं विषं कपाले निहितं विषम् ।	* °हतं * * °हतं *
	शिलायां जज्ञे तैमातः प्रथमो विषदूषणः ॥३॥	…°णी
	विषस्याहं वैन्दकस्य विषस्य दाल्भ्यस्य च ।	* वैर्दकस्य…
	अथो विषस्य मैत्रस्य शमनीं वाचम् अग्रभम् ॥४॥	…सामानीं * *
	तद् इद् वदन्त्व् अर्थिता उत शूद्रा उतार्याः ।	…उतार्य
	विषाणां विश्वगर्तानां सर्वथैवारसं विषम् ॥५॥	
पै ४.६.२^{१}	पुरुषस् त्वामृत कण्वो विष प्रथमम् आ वयम्? ।	
	यथा तन्वारोपयस् तथास्य् अरसं विषम् ॥६॥	
	यद्धो देवा उपचीका यद् वेधं सुशिरं दधुः ।	…उद् वेहं शुशिरं *
	तत्रामृतस्यासिक्तं तच् चकारारसं विषम् ॥७॥	…तश् चाका° *
पै ४.१९.६$^{१-३}$	शकुन्तिका मे [अ]ब्रवीद् विषपुष्पं धयन्तिका ।	शकुन्तिक…
	न रोपयति न सादयत्य् अरसं शरव्यं विषम् ।	…सार्व्यं *
	अभ्य् अपप्तानि दुर्गाणि सारीश् शकुनयो यथा ॥८॥	
	इहेन्द्राणीं वरुणानीं सिनीवालीं क्रकोष्याम्? ।	
	गृहान् शूरपुत्रान् देवं याचामो विषदूषणम् ॥९॥	गृही °पुत्रां…
	¿आलकं व्यालकं यावं जाल्प जिगीमहे ।	
	¿चरद्धिषं यवा भिषग् वयम् इच् छासामहे? ॥१०॥	
पै ३.४०.५$^{१.२}$	अस्थाद् द्यौर् अस्थात् पृथिव्य् अस्थाद् विश्वम् इदं जगत् ।	अस्ता * अथात्…
	अस्थुर् ¿विश्वस्यारोपयो अनड्वाहः कृषायवः? ॥११॥	
	यावत् सूर्यो ऽभितपति यावच् चाभिविपश्यति ।	* * वितपति * °वपश्यति
	तेनाहम् इन्द्र तत् तेन कृणोम्य् अरसं विषम् ।	
	तद् विषम् अरसं विषम् अधोभागे ऽरसं विषम् ॥१२॥ ॥का°५॥	उद्…

९.११

	मातरिश्वा सम् अभरद् धाता सम् अदधात् परुः ।	
	इन्द्राग्नी अभ्य् अरक्षतां त्वष्टा नाभिम् अकल्पयत् ॥१॥	
	भगस् त्वाभ्य् अरक्षद् रुद्रस् ते असुम् आभरत् ।	* * अनक्षद्…
	रात्रीस् त्वाभ्य् अगोपाय[न्] सा त्वं भूते अजायथाः ॥२॥	…अजायताम्
	द्यौष् ट आयुर् गोपायद् अन्तरिक्षम् असुं तव ।	द्यौष्टायुर्…
	माता भूतस्य भव्यस्य पृथिवी त्वाभि रक्षतु ॥३॥	
	यां त्वा देवास् समदधुस् सहस्रपुरुषां सतीम् ।	* * * °ददुस् सहस्वपुरुषं *
	साजे वित्तम् आस्येजम् अपाज व्यज विषम् ॥४॥	…व्यजा *
	याः पुरस्तात् प्रस्यन्दन्ते दिवा नक्तं च योषितः ।	
	आपः पुरस्तात् स्रवन्तीस् ता उ ते विषदूषणीः ॥५॥	* पुरस् * * * भे °षणी
	आतपस् ते वर्षम् आसीद् अग्निश् छायाभवत् तव ।	आतःपस्…तमः
	उल्बं ते अभ्रम् आसीत् सा त्वं भूते अजायथाः ॥६॥	…अजायताम्
	गन्धर्वस् ते मूलम् आसीच् छाखाप्सरसस् तव ।	
	मरीचीर् आसन् पर्णानि सिनीवाली कुलं तव ॥७॥	* आसं पूर्णानि…
	अजरा देवा आदधुर् अमृतं मर्त्येष्व् आ ।	* देवाददुर्…
	तस्यैतद् अग्रम् आ दधे तद् उ ते विषदूषणम् ॥८॥	* * * ददे…
पै ८.८.९$^{१.२}$	अनभ्रयः खनमाना विप्रा गम्भीरे ऽपसः ।	अनभ्रौ °नं विप्रं * °सं
	भिषक् चक्षुर् भिषक् खनं तद् उ ते विषदूषणम् ॥९॥	* * * खंन…
	याः पुरस्ताद् वितिष्ठन्ति गावः प्रव्राजिनीर् इव ।	
	अमृतस्येव वा अस्य् अतो ह्यस्य् अरुन्धती ॥१०॥	* वास्य् * * *
पै ९.८.४	यवमयस् सरघायाः पोषाय मध्व् आभरत् ।	योमयस्स्वरघाया पृषाय * *
	ततो यवः प्राजायत सो ऽभवद् विषदूषणः ॥११॥	* * प्रजायतस् * * विसदूषणा
	यवस्यैतत् पलालिनो गोधूमस्य तिलस्य च ।	* * गोदूमस्य…

	व्रीहेर् यवस्य दैवेन कृणोम्य् अरसं विषम् ॥१२॥	* यवस्यवस ...
	महीयोनौ समुद्रस् स्यान् ¿न निर्दं नृचायव? ।	महीयोन्यो ...
	तां देवा गुह्याम् आसीनां समुद्राच् चोद् आभरन् ॥१३॥	... च उदाभरं
	¿समुद्राच् चोदाभृत्योत् तां पुष्करा अदधुः? ।	* च उदाभृत्य उताम पुष्करादधुः
	अस्या× पृथिव्या देव्याश् चक्षुर् आकाश्यम् असि विषदूषणम् ॥१४॥	
	॥का° ६॥ ॥अनु° २॥	
	९.१२	
	समानम् अर्थं पारयन्ति देवा रूपंरूपं तपसा वर्धमानाः ।	* * पार्यन्ति * रूपोरूपं ...
	तद् आदित्यम् अभि सं विशन्ति तद् एकरूपम् अमृतत्वम् एषाम् ॥१॥	उद् आदिताम् * मं विपन्ति * एको° ...
	देवो देवेभिर् आगमन् मंहन् नो अदिति× पिता ।	* * आगमं मंहं ...
	¿सुप्रीत जातवेदसम् एकरूपो गुहा भवं? ॥२॥	
	आतिथ्यम् अग्निर् अवतु देव उभयेभि× पितृभिस् संविदानः ।	
	¿महान् मरीया उप भक्षम् आगन् सं गुर् भादित्यां निविष्टवह्निः? ॥३॥	... आगं मं * * *
	त आ विशन्ति पुरुषं शयानं प्राणा विष्ट्वा? नि शमयन्त्य् एनम् ।	ताविशन्ति * * * निष्ट्वा * पसन्त्य् *
	ते नो राज्या सुमनस्यमाना अह्ना रक्षन्त्व् अहृणीयमानाः ॥४॥	* * * °नाः अह्ना रक्षांत्व् °नां
	¿पशुभ्यो न× पशुपतये मृडस् सर्वस्यो निर् हायताम्? ।	
	मा न× प्राणो ऽप रीरिषः ॥५॥	...पु *
	वायुस् सत्ये ऽधिश्रित× प्राणापानाव् अभिरक्षन् ¿प्रदायुरेदिमां देवा-	* * °श्रुतः °नाम् °रक्षं ...
	यत्ता प्रजापता सादित्याश् च येमिरे? ।	
	पूषा रश्मिषु यत ।	* * यत्ता-
	आदित्यो विष्णुर् आक्रमे स्वा रोहन् दिवं रोहति ॥६–७॥	दित्यो ... स्व रोहं दिव *
शौ ५.२५.५[२]	प्र यातु देवस् सविता सर्वे? त्वष्टा रूपाणि पिंशतु ।	* * * सवितु ...
	अञ्जन्तो मधुना पयः ॥८॥	
	अतन्द्रं यातम् अश्विना विश्वे देवा× प्रयातन ।	* यातुम् अश्विनां ...
	आदित्यासस् सजोषस× पुर× पश्चात् स्वस्तये ॥९॥	°दित्यास्सस् ...
	ब्रह्म वर्म बृहस्पतिस् संगवो नो ऽभि रक्षतु ।	
	देवो देवै× पुरोहिता? ॥१०॥	
	मरुतो वृष्ण्या न आगमन् सत्यधर्माण ऊतये ॥११॥	* * नागमत् ...
	अपराह्णेषु जिन्वित इन्द्रो राजा दिवस् परि ।	अपराह्णेषु जिन्धतः ...
	¿रहर् मिमाय तिष्ठसि? स न इमा× कल्पयाद् दिशः ॥१२॥ ॥का° १॥	... नैमा× * *
शौ ५.३०.१–१०	**९.१३**	
	आवतस् ते परावत× परावतस् त आवतः ।	
	इहैव भव मा नु गा मा पूर्वां अनु गा गतान् असुं बध्नामि ते दृढम् ॥१॥	इहेव * * * ग * पूर्वां ... डढं
	यत् त्वाभिचेरु× पुरुषस् स्वो यद् अरणो जनः ।	यस् ... सो * अरुणो दनः
	उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥२॥	* उभय वादा ...
	यद् दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या ।	* अद्रोहित * स्त्री * चित्या
	[उन्मोचनप्रमोचने उभे वाचा वदामि ते] ॥३॥	
	यद् एनसो मातृकृताच् छेषे पितृकृताद् उत ।	... मातरिक्ताश् * पितृपुताद् *
	उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥४॥	* उभय ...
	यत् ते माता यत् ते पिता जामिर् भ्राता च सर्जत ।	...जामन् * * *
	प्रत्यक् सेवस्व भेष[जं] जरदष्टिं कृणोमि ते ॥५॥	* छेवस्य ...
	एह्येहि पुनर् एहि सर्वेण मनसा सह ।	येह्रियेहि पुनर् ...
	दूतौ यमस्य मानु गा अधि जीवपुरा [इ]हि ॥६॥	शतो * * गाधि ...
	अनुहूत× पुनर् एहि विद्वान् उदयनं पथः ।	अनुहत× ...
	आरोहणम् आक्रमणं जीवतोजीवतो ऽयनम् ॥७॥	
	मा बिभेर् न मरिष्यसि जरदष्टिर् भविष्यसि ।	* बिभेन् * परिष्यसि * *
	निर् अवोचम् अहं यक्ष्मम् अङ्गेभ्यो अङ्गज्वरं तव ॥८॥	* वोचमं यक्ष्मस् ...
	शीर्षरोगम् अङ्गरोगं यश् च ते हृदयामयः ।	... °मय

	यक्ष्मश् श्येन इव प्रापप्तद् वाचा नुत्तः परस्त[रा]म् ॥९॥	ययक्ष्म इयेनैव प्रापत्तद्...
	ऋषी बोधप्रतीवोधाव् अस्वप्नो यश् च जागृविः ।	...जागवि
	तौ ते प्राणस्य गोप्तारौ दिवा स्वप्नं च जाग्रतुः ॥१०॥ ॥का॰२॥	ते * प्रणम्य गोप्तारो ... जाग्रतु
शौ ५.३०.११–१७	**९.१४**	
	अयम् अग्निर् उपसद्य इह सूर्य उद् एतु ते ।	
[४]शौ कृष्णात्	उद् एहि मृत्योर् गम्भीरात् कृच्छ्राच् चित् तमसस् परि ॥१॥	
	नमो यमाय नमो [अ]स्तु मृत्यवे नमः पितृभ्य उत ये नयन्ति ।	* * नममो * * * पितुर्भ्यः...
	उत्पारणस्य यो वेद तम् अग्निं पुरो दधे [अस्मा अरिष्टतातये] ॥२॥	उतपारिणस्य * * त्वम्...
	एतु प्राण एतु मन एतु चक्षुर् अथो बलम् ।	
	शरीरम् अस्य सं विदां तत् पद्भ्यां प्र[ति] तिष्ठतु ॥३॥	शरीरमम् * * विदा ... तिष्यतु
	प्राणेनाग्ने चक्षुषा सं सृजेमं सम् ईरय तन्वा सं सर्जनेन ।	प्राणेनाग्नय ... सृजनेन
	वेत्थामृतस्य मा मृत मो षु भूमिगृहो भुवत् ॥४॥	
	मा ते प्राण उप दसन् मापानो अपि धायि ते ।	* * * * दसं * प धाय *
	सूर्यस् त्वाधिपतिर् मृत्योर् उदायच्छाति रश्मिभिः ॥५॥	* * मत्योंर्...
	इ[य]म् अन्तर् वदत्य् उग्रा जिह्वा पणिष्पदा ।	...मणिःपदा
[६]शौ त्वया यक्ष्मं निरवोचम्	तया रोगं वि नयामश् शतं रोपीश् च तक्मनः ॥६॥	तातया रोमं * * * रोमी * उक्सना
	अयं लोकः प्रियतमो देवानाम् अपराजितः ।	
	यस्मै त्वम् इह जज्ञिषे दिष्टः पुरुष मृत्यवे ।	तस्मै...अदृष्टः * *
	तस्मै त्वानु ह्वयामसि मा पुरा जरसो मृथाः ॥७॥ ॥का॰३॥	* त्वानि ह्येयामसि ... मृथा
	९.१५	
शौ ५.१७.१ ऋ १०.१०९.१	ते ऽवदन् प्रथमा ब्रह्मकिल्बिषे [अ]कूपारस् सलिलो मातरिश्वा ।	तं वदं प्रथा...
	वीडुहरास् तप उग्रं मयोभुव आपो देवीः प्रथमजा ऋतस्य ॥१॥	वीडुहरस्...अपोपो * * *
शौ २ ऋ २	सोमो राजा प्रथमो ब्र[ह्म]जायां पुनः प्रायच्छद् अहृणीयमानः ।	
	अन्वर्तिता वरुणो मित्र आसीद् अग्निर् होता हस्तगृह्या निनाय ॥२॥	अन्वन्तित्वा ... ॰गृह्ना *
शौ ३ ऋ ३	हस्तेनैव ग्राह्य आधिर् अस्या ब्रह्मजायेति चेद् अवोचत् ।	* * आदिर्...
	न दूताय प्रह्येया तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥	* * प्रह्मा तस्त * * राष्टे...
शौ ४	याम् आहुस् ¿तारकां विकेशीडत् प्राग्? ग्रामम् अवपद्यमानाम् ।	...प्रागाममवपभ्यमाना
	सा ब्रह्मजाया प्र दुनोति राष्ट्रं यत्र प्रापादि शश उल्कुषीमान् ॥४॥	* * * तिनोतु * * प्रापादि शमु उल्कखीमां
शौ ५ ऋ ५	ब्रह्मचारी चरति वेविषद् विषस् स देवानां भवत्य् एकम् अङ्गम् ।	* * वेविशद्... भावत्य् * *
	तेन जायाम् अन्व् अविन्दद् बृहस्पतिस् सोमेन नीतां जुह्वं न देवाः ॥५॥	...निहतां * * *
शौ ६ ऋ ४	देवा एतस्याम् अजायन्त पूर्वे सप्तर्षयस् तपस् ते ये निषेदुः ।	* एतस्यापजयंतु...
	भीमा जाया ब्राह्मणस्यापनीता दुर्धां दधाति परमे व्योमन् ॥६॥	* * ब्रह्मणस्यापिनिहिता दुर्धां ददाति...
शौ ७	ये गर्भा अवपद्यन्ते जगद् यच् चापलुप्यते ।	य गर्भावपभ्य(उपरि त्व)न्ते * * चापिलुप्यते
	वीरा ये हन्यन्ते मिथो ब्रह्मजाया हिनस्ति तान् ॥७॥	* * हन्योन्ते ... ताम्
	सर्वे गर्भाः प्र व्यथन्ते कुमारा दशमास्याः ।	सर्व...
शौ १२$^{३.४}$	यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥८॥	अस्मिन्... ॰यादित्ता
ऋ ६ शौ १०	पुनर् वै देवा अददुः पुनर् मनुष्या उत ।	
	राजानस् सत्यं कृण्वाना ब्रह्मजायां पुनर् ददुः ॥९॥	* * कृण्वानो * न पुनर् *
शौ ११ ऋ ७	पुंनर्दाय ब्रह्मजायां कृत्वा देवैर् निकिल्बिषम् ।	यो पुनर्दाय ... नकिल्विषं
	ऊर्जं पृथिव्या भक्त्वोरुगायम् उपासते ॥१०॥ ॥का॰४॥	...भक्त्वोभगायम् *
	९.१६	
शौ ५.१७.१८	न तत्र धेनुर् दोह्या नानड्वान् सहते धुरम् ।	* * धेनु द्रोहे...
	विजानि[र्] यत्र ब्राह्मणो रात्रिं वसति पापया ॥१॥	...रात्रिं * * । (प्रान्ते विदत्र)
शा ५.१९.१५	न वर्षं मैत्रावरुणं ब्रह्मज्यम् अभि वर्षति ।	...ब्रह्मज्याम् * *
	नास्मै समितिः कल्पते न मित्रं नयते वशम् ॥२॥	आस्मै...
	असुङ्मती? चरति ब्रह्मजाया शालं पङ्क्तीः प्रदिशश् चतस्रः ।	* * ॰जायां...
	यः क्षत्रियः पुनर् एनां ददातु स दिवो दारां ययातु प्रपीनाम् ॥३॥	...॰णाम्
	पुनर्दाय ब्रह्मजायां राजा कल्पे न पद्यते ।	यो पुनर्दाय...

	दुर्योणे [अ]स्मा ओषधिर् याकाश्याभिविपश्यती? ॥४॥	दुर्योणो * °धीर् °वपश्यती
	विषम् उष्णात्य् अपां विषम् उष्णाति वीरुधाम् ।	* * अपा...
	यो ब्रह्मजायां न पुनर् ददाति तस्मै देवास् स्वधितिं दिग्धम् अस्यान् ॥५॥	...सुधियं * अस्यां
शौ ५.१७.८	उत यत् पतयो दश स्त्रियाः पूर्वे [अ]ब्राह्मणाः ।	तत् पदयो दिश...
	ब्रह्मा चेद् ध[स्त]म् अग्रहीत् स एव पतिर् एकधा ॥६॥	
शौ ९	ब्राह्मण एव पतिर् न राजा नोत वैश्यः ।	ब्राह्मणेव पतिन्... वैश्यत्
	तत् सूर्यः प्रब्रुवन्न् एतु पञ्चभ्यो मानवेभ्यः ॥७॥ ॥का°५॥	...अयतु * *

९.१७

शौ ५.१८.१	नैतां ते देवा अददुस् तुभ्यं नृपते अत्तवे ।	* * देवाददुस्...
	मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ॥१॥	...नाड्याः
शौ २	अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः ।	अक्षदुग्धो * पापान्ममपरा°
	स ब्राह्मणस्य गाम् अद्याद् अद्य जीवानि मा श्वः ॥२॥	* * * अद्य तद्य * म श्वा
शौ ४[१.२]	निर् वै क्षत्रं नयति हन्ति वर्चो [अ]ग्निर् [इ]वालब्धः प्र दुनोतु राष्ट्रम् ।	...हन्त * * * पृ तन्नोतु *
शौ १३[३.४]	यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृणाम् अप्य् एतु लोकम् ॥३॥	...हिनस्ति त स्य * * * *
शौ १३[१.२]	देवपीयुश् चरति मर्त्येषु गरगीर्णो भवत्य् अस्थिभूयान् ।	°पीयूंश् * * °गीर्त्यो * °भूयां
शौ ४[३.४]	यो ब्राह्मणं मन्यते अन्नम् एव स विषस्य पिबति तैमातस्य ॥४॥	...°स्या
	विषं स पिबति तैमातं पश्यन्न् अग्निं प्र सीदति ।	
शौ ५.१९.९[३.४]	यो ब्राह्मणस्य सद् धनम् अभि नार[द] मन्यते ॥५॥	* * श्रद्...
शौ ५.१८.७	शतापाष्ठा नि षीदत तां न शक्नोति निष्खिदम् ।	सतापाष्ठा * * * * शिखनोत निष्किदं
[२]शौ अन्नं यो ब्रह्मणां मल्वः	अन्नं यो ब्रह्मणां नन्दन् स्वाद्व् अद्मीति मन्यते ॥६॥	अन्न * ब्रह्मणा नन्दस् साद्व् अनमीत *
शौ ५	य एनां हन्यान् मृदुं मन्यमानो देवपी[युर्] धनकामो न चित्तात् ।	* * हन्य मृद * * बनकामो * चिन्ता
	सं तस्येन्द्रो हृदये अग्निम् इन्द्ध उभे एनं द्विष्टो नभसी चरन्तम् ॥७॥	सन् तश्चेअन्धो * अग्निबन्धो उभैनं दष्टो * *
शौ ६	न ब्राह्मणो हिंसितव्यो [अ]ग्नेः प्रियतमा तनूः ।	* * हिंसितवाग्नेः ...
	सोमो ह्य् अस्य दायाद इन्द्रो [अ]स्याभिशस्तिपाः ॥८॥	...°पात्
शौ १४	अग्निर् वै नः पदवाय[स्] सोमो दायाद उच्यते ।	
[२]शौ हन्ताभिशस्तेन्द्रः	जयते ऽभिशस्त इन्द्रस् तत् सत्यं देवसंहितम् ॥९॥	जयताभिशस्त...
शौ ३	आविष्टिताघविषा पृदाकूर् इव चर्मणा ।	°तघहविषा प्रजाकूर् * शर्मणा
	ब्राह्मणस्य राजन्य तृष्टैषा गौर् अनाद्या ॥१०॥ ॥का°६॥	* राजन्यस् तृप्सीषा * अनाड्यः

९.१८

शौ ५.१८.१५	इषुर् इव दिग्धा नृपते पृदाकूर् इव गोपते ।	
	सा ब्राह्मणस्येषुर् दिग्धा तया विध्यतु पीयतः ॥१॥	* °स्येपुन्... पीतया [* मृषां
शौ ९	तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो याम् अस्यन्ति शरव्यां न सा मृषा ।	तीक्ष्ण इषवो ब्रह्मणा * * अस्सन्ति शर्व्यां नि
	अनुहाय तपसा मन्युना चोत दूराद् अ[व] भिन्दन्ति ते तया ॥२॥	अनूहायति... [(उपरि प्रान्ते दि)ग्धा
शौ ८	जिह्वा ज्या भवति कुल्मलं वाङ् नाडीका दन्ता[स्] तपसा सुदिग्धाः ।	* भ्या(उपरि प्रान्ते था) * कुन्मलं... सिद्धि-
	तेभिर् ब्रह्मा विध्यातु देवपीयुं निर्जलै[र्] धनुर्भिर् देवजूतैः ॥३॥	* ब्राह्म विद्या(उपरि ध्या)तु देवपीयं * वनुर्भिर्
	ये ब्राह्मणं हिंसितारस् तपस्विनं मनीषिणं ब्रह्मचर्येण श्रान्तम् ।	...मणीषिणं * * [°जूतेः
	अवर्तिमद् भविता राष्ट्रम् एषां तपसैव निहतं ¿नानु वेतु? ॥४॥	
शौ १०	ये सहस्रम् अराजन्न् आसन् दशशता उत ।	* * अराजंनाशं दशताद् *
	तेभ्यः प्र ब्रवीमि त्वा वैतहव्याः पराभवन् ॥५॥	...°भुवं
शौ ११	गौर् एव तान् हन्यमाना वैतहव्यीं इवाचरत् ।	* * तां हन्यमनो वैतव्यां *
	ये केसरप्राबन्धायाश् चरमाजाम् अपेचिरन् ॥६॥	...केशरप्रापुंदायश् चारुमादा उपेचरं
	अतिमात्रा अजायन्त नोद् इव दिवम् अस्पृशन् ।	अभि॰ जायन्ति * इवि दिवि पस्पृशं
शौ १२[३.४], ५.१९.११[३.४]	प्रजां हिंसित्वा ब्राह्मणीम् असंभव्यं पराभवन् ॥७॥	सग हिंसत्वा ब्रह्मीम् अमुंभव्यं पराभुवं
शौ ५.१९.२ [कान्यावयत्	ये बृहत्सामानम् आङ्गिरसम् आर्पयन् ब्राह्मणं जनाः ।	...आल्पयं * *
शौ पेत्वस्तेषामुभयादमविस्तो-	¿तेत्वक्क् स्तोकाम् उभयादन् यत् स्तोकान्य् आमयत्? ॥८॥	
शौ ३। [२]शौ कोशेषु शुल्कम् अपि	ये ब्राह्मणं प्रत्यष्ठीवन् ये चास्मै शुल्कम् ईषिरे ।	* * प्रत्युष्ठीवं यश् * * ईशिरे
	अक्षास् ते मध्ये कुल्यायाः केशान् खादन्त आसते ॥९॥	अखस्... अखादन्तासते
शौ ७	अष्टापदी चतुरक्षी चतुश्श्रोत्रा चतुर्हनुः ।	...°ता *

द्विजिह्वा द्विप्राणा भूत्वा सा राष्ट्रम् अव धूनुते ॥१०॥ ॥का॰७॥ …अवि *

९.१९

शौ ५.१९.४ ब्रह्मगवी पच्यमाना यावत् साभि विजङ्गहे । * पद्यमाना … वजंगहे
तेजो राष्ट्रस्य निर् हन्ति न वीरो जायते पुमान् ॥१॥
आक्रमणेन वै देवा द्विषन्तो घ्नन्ति पूरुषम् । …पौरुषं
ते अजन् ब्रह्मज्यं क्षेत्रे [अ]थानृतवादिनम् ॥२॥ * आजं व्रह्मजं * ता अनृत॰
शौ १० विषम् एतद् देवकृतं राजा वरुणो अब्रवीत् ।
न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश् चन ॥३॥ ते * * दुग्ध्वा * जागर…
शौ ८ तद् वै राष्ट्रम् आ स्रवति भिन्नां नावम् इवोदकम् । …॰कं। ब्राह्मणो यत्र जीयते तद्राष्ट्रमास्रवति छिन्नां
शौ ६[४],८[४] ब्राह्मणो यत्र जीयते तद् राष्ट्रं हन्ति दुच्छुना ॥४॥ …हवि दुश्छुना [नावमिवोदकं
शौ ५.१८.१२ एकशतं वै जनता भूमिर् या व्यधूनुत । * * जवता * याद् विधूनत×
प्रजां हिंसित्वा ब्राह्मणीम् असंभव्यं पराभवन् ॥५॥ प्रजा हिंसत्वा ब्राह्मीममूं भव्यं परामुवं
याम् उदाजन्न् ऋषयो मनीषिणश् शपुसातां? बृहतीं देवजूताम् । * * आजं गृषयो…
सा ब्रह्मज्यं पचति पच्यमाना राष्ट्रम् अस्य बृहती यच् च वर्चः ॥६॥ * * * पच(उपरि प्रान्ते पच्य)माना…
वाचा ब्राह्मणम् इच्छति जामियं? हन्ति चित्त्या । …चिभ्या
मित्राय सत्ये द्रुह्यति यं देवा घ्नन्ति पूरुषम् ॥७॥ ॥का॰८॥ …पौरुषम्

९.२०

एकपाच् छन्द एकपदश् च पशून् स तद् आप्नोति चाव च रुन्द्धे प्रथमया रात्र्या प्रथमया समिधा ॥१॥ * * एककासून्च त आप्नोति…
द्विपाच् छन्दो द्विपदश् च पशून् [स] तद् आप्नोति चाव च रुन्द्धे द्वितीयया रात्र्या द्वितीयया समिधा ॥२॥
त्रिपाच् छन्दस् त्रींश् च लोकान् स तद् आप्नोति चाव च रुन्द्धे तृतीयया रात्र्या तृतीयया समिधा ॥३॥
चतुष्पाच् छन्दश् चतुष्पदश् च पशून् [स] तद् आप्नोति चाव च रुन्द्धे चतुर्थ्या रात्र्या चतुर्थ्या समिधा ॥४॥
पञ्च दिशः पञ्च [च] प्रदिशस् [स] तद् आप्नोति चाव च रुन्द्धे पञ्चम्या रात्र्या पञ्चम्या समिधा ॥५॥
त्रैष्टुभं छन्दो विराजं स्वराजं सम्राजं [स] तद् आप्नोति चाव च रुन्द्धे षष्ठ्या रात्र्या षष्ठ्या समिधा ॥६॥
सप्त प्राणान् सप्तापानान् सप्तर्षींश् च [स] तद् आप्नोति चाव च रुन्द्धे सप्तम्या रात्र्या सप्तम्या समिधा ॥७॥ * प्राणां सप्तानां…चा
ओजश् च तेजश् च सहश् च बलं च [स] तद् आप्नोति चाव च रुन्द्धे अष्टम्या रात्र्याष्टम्या समिधा ॥८॥ … रात्र्या अष्टम्या *
अन्नश् च महश् चान्नं चान्नाद्यं च [स] तद् आप्नोति चाव च रुन्द्धे नवम्या रात्र्या नवम्या समिधा ॥९॥ * * * च अन्नं च अन्नाद्यं…
ब्रह्म च क्षत्रं चेन्द्रियं च ब्राह्मणवर्चसं च [स] तद् आप्नोति चाव च रुन्द्धे दशम्या रात्र्या दशम्या समिधा ॥१०॥
विश्वावसु च सर्ववसु च [स] तद् आप्नोति चाव च रुन्द्धे एकादश्या रात्र्यैकादश्या समिधा ॥११॥
पाङ्क्तं छन्दः प्रजापतिं संवत्सरं [स] तद् आप्नोति चाव [च] रुन्द्धे द्वादश्या रात्र्या द्वादश्या समिधा ॥१२॥ ॥का॰९॥ ॥अनु॰३॥ पाङ्क्तश…

९.२१

यो वा एकशरावं निर्वपेद् एकऋषिम् एवानु निर्वपेत् । ओं यो…एकर्षिम् * *
एष वा एकऋषिर् यद् अग्निः ।
एकऋषिं चैव लोकं चावरुन्द्धे ।
एकऋषिर् इव तपत्य् एकऋषिर् इव दीदायैकऋषिर् इवान्नादो भवति य एवं वेद । * * तपत्ये * * दीदाय एकर्षिर्…
स एवं विद्वान् प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥

एकऋषेस् त्वा चक्षुषा पश्याम्य् एकऋषेस् त्वा हस्ताभ्याम् आ रभे ।	* * * पश्यामि एक°...रभेद्
एकऋषेस् त्वास्येन प्राश्नाम्य् एकऋषेस् त्वा जठरे साधयामि ॥	* त्वास्यनु...
इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति ॥१॥	
[यो] वै द्विशरावं निर्वपेत् प्राणापानाव् एवानु निर्वपेत् ।	
एते वै प्राणापानौ यन् मातरिश्वा चाग्निश् च ।	
प्राणापानौ चैव लोकं चाव रुन्द्धे ।	
ज्योग् जीवति सर्वम् आयुर् एति न पुरा जरस× प्र मीयते य [एवं वेद ।	
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥	
प्राणापानयोस् त्वा चक्षुषा पश्यामि प्राणापानयोस् त्वा हस्ताभ्याम् आ रभे ।	...रभेत्
प्राणापानयोस् त्वास्येन प्राश्नामि प्राणापानयोस् त्वा [जठरे साधयामि ।	* त्वास्यनु...
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥२॥	[त्रिकाद्रुकान्यनु निर्वपेद्
[यो] वै त्रिशरावं निर्वपेत् त्रीण्य् एव त्रिकद्रुकाण्य् अनु निर्वपेत् ।	...त्रिकाद्रुकाद्रुकान्य् * * । एतानि वै त्रीणि
एतानि वै त्रीणि त्रिकद्रुकाणि यद् ऋचस् सामानि यजूंषि ब्राह्मणम् ।	...त्रिकाद्रुकाण्य् अजुर् यजुस् सामानि * *
ब्रह्म चैव लोकं चाव रुन्द्धे ।	
ब्राह्मणवर्चसी भवति य [एवं वेद ।	
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥	
ब्रह्मणस् त्वा चक्षुषा पश्यामि ब्रह्मणस् त्वा हस्ताभ्याम् आ रभे ।	ब्राह्मणस् * * * ब्रह्मनस्...रभेद्
ब्रह्मणस् त्वास्येन प्राश्नामि ब्रह्मणस् त्वा [जठरे साधयामि] ॥	
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥३॥	
[यो] वै चतुश्शरावं निर्वपेच् चतस्र एवोर्वीर् अनु निर्वपेत् ।	* * चतुशरावं...
एता वै चतस्र उर्वीर् यद् दिशः ।	* वैश्...
दिशश् चैव लोकं चाव रुन्द्धे ।	
कल्पन्ते ऽस्मै दिशो दिशां प्रियो भवति य [एवं वेद ।	
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥	
दिशानां त्वा चक्षुषा पश्यामि दिशानां त्वा हस्ताभ्याम् आ रभे ।	...रभेद् । दिशानां त्वा चक्षुषा पश्यामि दिशानां
दिशानां त्वास्येन प्राश्नामि दिशानां त्वा [जठरे साधयामि ॥	[त्वा हस्ताभ्यामारभेद्
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥४॥	
[यो] वै पञ्चशरावं निर्वपेद् वैश्वानरम् एव पञ्चमूर्धानम् अनु निर्वपेत् ।	
एष वै वैश्वानर× पञ्चमूर्धा यद् द्यौश् च पृथिवी च र सा व ति पं ? ।	एते...
वैश्वानरं चैव लोकं चाव रुन्द्धे ।	
वैश्वानर इव तपति वैश्वानर इव दीदाय वैश्वानर इवान्नादो भवति य [एवं वेद ।	वैश्वानरं तपति वैश्वानरीव * वैश्वानरीवान्नादो * *
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥	
वैश्वानरस्य त्वा चक्षुषा पश्यामि वैश्वानरस्य त्वा हस्ताभ्याम् आ रभे ।	...रभेद् । वैश्वानरस्य त्वास्येन प्राश्नामि वैश्वान-
वैश्वानरस्य त्वास्येन प्राश्नामि वैश्वानरस्य त्वा [जठरे साधयामि ॥	[रस्य त्वा हस्ताभ्यामारभेद्
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥५॥	
[यो] वै षट्शरावं निर्वपेत् षडश्याम्न एव देवान् अनु निर्वपेत् ।	
एते वै षडश्यामानो देवा यद् ऋतवः ।	* * °वानो...
ऋतूंश् चैव लोकं चाव रुन्द्धे ।	
कल्पन्ते ऽस्मा ऋतवो नर्तुष्व् आवृश्च्यत ऋतूनां प्रियो भवति य [एवं वेद ।	कल्पन्तै स्मै * * आवृश्वतु ऋतूनां...
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव [देव]तां मनसा ध्यायेत् ॥	
ऋतूनां त्वा चक्षुषा पश्याम्य् ऋतूनां त्वा हस्ताभ्याम् आ रभे ।	* * * पश्यामि...रभेद्
ऋतूनां त्वास्येन प्राश्नाम्य् ऋतूनां त्वा [जठरे साधयामि ॥	...°श्नामि ऋतूनां...
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥६॥	
[यो] वै सप्तशरावं निर्वपे[त्] सप्तऋषीन् एवानु निर्वपेत् ।	
एते वै सप्तऋषयो यत् प्राणापानव्यानाः ।	...°पानाव्याना
सप्तऋषींश् चैव लोकं चाव रुन्द्धे ।	सप्तर्षींश्...
सप्तऋषिर् इव तपति सप्तऋषिर् इव दीदाय सप्तऋषिर् इवान्नादो भवति य [एवं वेद ।	सप्तर्षिर् * * सप्तर्षिर् * * सप्तर्षीवान्नादो *
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ।	

सप्तऋषीणां त्वा चक्षुषा पश्यामि सप्तऋषीणां त्वा हस्ताभ्याम् आ रभे।
सप्तऋषीणां [त्वा]स्येन प्राश्नामि सप्तऋषीणां त्वा [जठरे साधयामि ॥
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥७॥
यो वा अष्टशरावं निर्वपेद् विराजम् एवाष्टापदीम् अनु निर्वपेत् ।
एषा वै विराड् अष्टापदीर् यद् द्यौश् च पृथिवी चापश् चौषधयश् च ।
विराजत्य् अस्मिंश् च लोके ऽमुष्मिंश् च ।
वैराज ऋषभ इत्य् एनम् आहुर् य [एवं वेद ।
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥
विराजस् त्वा चक्षुषा पश्यामि विराजस् त्वा हस्ताभ्याम् आ रभे ।
विराजस् त्वास्येन प्राश्नामि विराजस् त्वा [जठरे साधयामि ॥
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥८॥
[यो] वै नवशरावं निर्वपेन् नवयाम्न एव देवान् अनु निर्वपेत् ।
एते वै नवयामानो देवा यन् मासः ।
मासंश् चैव लोकं चाव रुन्द्धे ।
कल्पन्ते ऽस्मै मासा मासानां प्रियो भवति य [एवं वेद ।
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥
मासानां त्वा चक्षुषा पश्यामि मासानां त्वा हस्ताभ्याम् आ रभे ।
मासानां त्वास्येन प्राश्नामि मासानां त्वा [जठरे साधयामि ॥
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥९॥
[यो] वै दशशरावं निर्वपे[द् इ]डाम् एव धेनुम् अनु निर्वपेत् ॥
एषा वा इडा धेनुर् यद यज्ञ× पशवः ।
इडां चैव धेनुं च यज्ञं च लोकं च पशूंश् चाव रुन्द्धे ।
कल्पन्ते ऽस्मा इड इडां प्रियो भवति य [एवं वेद ।
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ॥
इडायास् त्वा चक्षुषा पश्यामीडायास् त्वा हस्ताभ्याम् आ रभे ।
इडायास् त्वास्येन प्राश्नामीडायास् त्वा [जठरे साधयामि ॥
[इति स यथा हुतम् इष्टं प्राश्नीयाद् एवैनं प्राश्नाति] ॥१०॥
यो वा एकादशशरावं निर्वपेद् रोहितम् एवानु निर्वपेत् ।
एष वै रोहितो यद् इन्द्रः ।
इन्द्रं चैव लोकं चाव रुन्द्धे ।
कल्पन्ते ऽस्मा इन्द्रिया प्रिय इन्द्रस्य भवति य [एवं वेद ।
[स एवं विद्वान्] प्राश्नीयाद् एताम् एव देवतां मनसा ध्यायेत् ।
इन्द्रस्य त्वा चक्षुषा पश्यामीन्द्रस्य त्वा हस्ताभ्याम् आ रभे ।
